# संस्कृतवार्ता:

दिनाङ्क :- 23.11.2025

प्रात: - 06:55

## प्रधानमन्त्री/जी-20-सम्मेलनम्

प्रधानमन्त्री नरेन्द्रमोदी दक्षिणाफ्रीकादेशस्य जोहान्सबर्ग-नगरे आयोजितस्य जी-विंशति-शिखरसम्मेलनस्य प्रथमं सत्रं संबोधितवान्। श्रीमोदी अवदत् यत् वैश्विकविकासस्य मानदण्डानां पुनरवलोकनस्य, सर्वसमावेशस्य सुस्थिरतायाः च वृद्ध्यै प्राथमिकतायाः च कृते अयमेव उचितः कालः अस्ति। सः अवदत् यत् भारतस्य सभ्यतायाः मूल्यानि, विशेषतः एकीकृत-मानवतावादस्य सिद्धान्तः अग्रेसर्तुं सार्थकमार्गं प्रदर्शयति। प्रधानमन्त्रिणा स्वास्थ्यापत्कालेषु प्राकृतिकापत्सु च संयुक्तरूपेण कार्यं कुर्वन् विश्वं सुदृढं कर्तुं जी-विंशति-वैश्विक-स्वास्थ्य-सेवा-प्रतिक्रिया-दलस्य निर्माणाय अपि प्रस्तावम् उपस्थापितवान्। सः अवदत् यत् तेषां प्रयासः जी-विंशति-सदस्य-राष्ट्राणां प्रशिक्षित-चिकित्सकीय-विशेषज्ञ-दलानां निर्माणाय भवेत्, यानि दलानि कदापि आपत्काले सत्वरं सज्जानि भवेयुः।

प्रधानमन्त्री जी-विंशति-शिखरसम्मेलनावधौ अनेकैः विश्वनेतृभिः सह संवादं कृतवान्। श्रीमोदी अवदत् यत् अङ्गोला-देशस्य राष्ट्रपतिना अफ्रीका-सङ्घस्य अध्यक्षेण च जोआओ-मैनुएल-गोन्साल्वेज-लौरेन्सो इत्यनेन सह सुष्ठु चर्चा अभवत्। प्रधानमन्त्रिणा उक्तं यत् भारतस्य अङ्गोला-देशेन सह मैत्री अमूल्यम् अस्ति तथा च उभौ देशौ व्यापारस्य सांस्कृतिकसम्बन्धस्य च विस्ताराय युगपत् कार्यं कुरुतः। श्रीमोदी इथियोपिया-देशस्य प्रधानमन्त्रिणा अबीय-अहमद-अली इत्यनेन सह अपि मिलित्वा भारत-इथियोपिया-सम्बन्धं सुदृढं वर्णितवान्। अन्यस्मिन् सत्रे प्रधानमन्त्रिणा जर्मनीदेशस्य राष्ट्राध्यक्षेण फ्रेडरिक-मर्जेण सह वार्तालापः कृतः।

## जी-20-घोषणा

दक्षिणाफ्रीका-देशस्य जोहान्सबर्गनगरे जी20-शिखरसम्मेलने विश्वनेतारः अमेरिकीय-विरोधम् उपेक्ष्य सहमतिद्वारा संयुक्तघोषणाम् एकाम् अङ्गीकृतवन्तः। घोषणायाम् एकता, समानता, स्थायित्वं च समावेशि-वैश्विकवृद्धेः अत्यावश्यकाः स्तम्भाः वर्णिताः। ऊनचत्वारिंशत्-पृष्ठात्मिकायां संहितायाम् ऊर्जासुरक्षा, जलवायुकार्याणि, आपत्प्रतिरोधकता इत्यादि-विषयाः चर्चिताः सन्ति। वर्धमानानि भूराजनैतिकानि आपीडनानि, संघर्षाः गभीरा असमानता च आर्थिकस्थिरतायै तर्जना-रूपेण स्वीकृतानि। घोषणायाम् बहुपक्षीयसहकार्यस्य, अन्ताराष्ट्रियविधीनां पालनस्य, शान्तिपूर्ण-विवादनिराकरणस्य च चर्चा वर्तते।

## संस्कृत-साप्ताहिकी

प्रिया: श्रोतार:, संस्कृत-जगता सम्बद्धै: विभिन्नै: क्रिया-कलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ्.एम्.गोल्ड्-प्रवाहिकातः अद्य मध्याह्ने सार्धैक-वादनतः भविष्यति। भवन्त: सर्वे यथाकालं श्रोतुं प्रभवन्ति।

## क्रिकेट्

गुवाहाट्याः बारसापाड़ा क्रिकेट् क्रीडाङ्गणे भारतं विरुध्य द्वितीयायाः अन्तिमायाः च क्रिकेट् निकष स्पर्धायाः प्रथमे दिवसे दक्षिणाफ्रीका-दलेन षट् क्रीडकानां हानि पुरस्सरं सप्तचत्वारिंशदधिकद्विशत-धावनांकाः समर्जिताः। इतः

पूर्वं दक्षिणाफ्रीकादलेन पणकं विजित्य प्रथमं क्रीडनाय निर्णयः कृतः। ध्यातव्यमस्ति यत् दक्षिणाफ्रीका दलेन प्रथमायां क्रिकेट् निकष स्पर्धायां भारतीयदलं पराजितमासीत्।

बैडमिण्टन्

आस्ट्रेलियन्-ओपन्-बैडमिण्टन्-स्पर्धा-मालिकायां पुरुषैकल-वर्गे भारतस्य लक्ष्यसेनः निर्णायकचक्रं प्राविशत्। सः गतदिने चीनस्य चाउ-तेइन-चेनं 17-21, 24-22, 21-16-अङ्कान्तरालेन पराजितवान्। अद्य सेनः निर्णायकसङ्घर्षे जापानदेशस्य युशी तनाकां सम्मुखीकरिष्यति।

।।इति वार्ता:।।